श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ ऐश्वर्यस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ ऐश्वर्यस्तबकः ॥

विश्वस्य जननीमेव विश्वस्य शरणं वृणे।
विश्वम्भरसमैश्वर्यां विदुर्यां ब्रह्मवादिनः॥ १॥

अनुपाधिकमम्ब ते मुरारेः
    अपि साधारणमाहुरीशितृत्वम्।
स्फुटमत्र निदर्शनं प्रतीमो
    ननु मित्रावरुणादि देवतात्वम्॥ २॥

अविशेषमशेष शेषिभावं
    युवयोर्यद्यपि वर्णयन्ति सन्तः।
तनये जलधेर्मिथः प्रतीतः
    तदपि स्वामिनि शेषशेषिभावः॥ ३॥

तुल्येऽपि ते नाथविशेषणत्वे
    व्यक्तं गुणादस्ति विशेष एषः।
प्रत्यक्त्वमब्धेः तनये भवत्याः
    प्राज्ञा गुणानां च पराक्त्वमाहुः॥ ४॥

संसाराब्धौ मज्जतां सज्जनानां
    रक्षायज्ञे दीक्षितो राक्षसारिः।
अम्भोराशेः पुत्रि पत्न्यास्तवासा-
    वन्वारम्भं नित्यमेत्यम्बुजाक्षः॥ ५॥

अस्येशानेत्यागमस्तावदास्ताम्
    ऐश्वर्येऽस्मिन्नस्मदम्ब त्वदीये।
जागर्त्येव व्यासतातप्रणीतं
    श्लाघ्यं विष्णोस्तत् पुराणं प्रमाणम्॥ ६॥

www.prapatti.com

जल्पाकास्ते जीवकोटिं प्रवेशं
  स्वल्पप्रज्ञा ये रमे कल्पयन्ति।
विश्वं व्याप्तं विष्णुनाम्ब त्वया चे-
  त्युक्तिस्तान् प्रत्युत्तरं शक्तिसूनोः॥ ७॥

वेदोद्याने पारिजातायमानं
  श्रीसूक्तं तज्जायतां श्रेयसे नः।
पारेवाचां भासुरे त्वत्प्रभावे
  चक्षुष्मन्तो देवि येनैव सन्तः॥ ८॥

दम्पत्योरिह युवयोरधीश्वरत्वं
  व्यासज्य स्थितिमिति सङ्गतं मतं नः।
विश्वाम्ब श्रुतिकथितं विहाय पत्नीं
  कर्तृत्वं क्रतुषु न केवलस्य पुंसः॥ ९॥

दत्ताशयासु भवतीमहिमोपदेशे
  तत्तादृशीषु निगमान्त सरस्वतीषु।
नारायणप्रियतमे निखिलाभ्युपेतं
  रामायणं ननु जयत्युपबृंहणं नः॥ १०॥

एकग्रीवैंः निगमशिखरैरिन्दिरे निर्विशेषं
  विश्वव्याप्तिर्जननि युवयोर्व्यक्तमुद्घुष्यमाणा।
ज्ञानद्वारा तव मधुरिपोरात्मनैवेत्यलीका
  वैषम्योक्तिः कुत उपनता हन्त केषाञ्चिदेषा॥ ११॥

वैभवं तव मुकुन्दपत्नि यो
  वेद वेदशिखरानुवर्णितम्।
वैभवं भुवि स विन्दति स्थिरं
  दुस्त्यजं त्यजति वै भवं ततः॥ १२॥

ऐश्वर्यमात्र मधुहन्तुरपह्नुते यो
  यो वा तवापि जगदम्ब तयोरुदीच्यः।

प्राच्यात् प्रदुष्यति विशिष्य पितृद्विषोऽपि
मातृद्विषस्त्रिभुवने महती हि गर्हा॥ १३ ॥

श्रीमद् रामावरजसरणिं श्रेयसीमाश्रितानाम्
आचार्याणामपि च कुहचिद् यस्तवाणुत्ववादः।
तस्याकूतं परमपुरुषापेक्षया तेऽब्धिकन्ये
शेषत्वेन स्वत उपनत न्यूनतायां प्रतीमः॥ १४ ॥

राजन्वन्ति जगौ जगन्ति निगमो द्वाभ्यां युवाभ्यामपि
द्वैराज्यं न हि तावता प्रसजति क्षीराम्बुधेरात्मजे।
आम्नावैष्णव शब्दभाजि यजनेऽधिष्ठानयुग्माश्रिताम्
एकामेव हि देवतां सुमनसः शंसन्ति मीमांसकाः॥ १५ ॥

रामाकारे जनकतनया रुक्मिणी कृष्णरूपे
भर्तुः कृष्णाजिनमुपगता ब्रह्मचर्येऽपि पद्मे।
अन्तर्यन्तुः सकलजगतामच्युतादच्युतां त्वं
धत्से मूर्तिं तदिह युवयोः प्रस्फुटो नित्ययोगः॥ १६ ॥

पदव्यां भव्यायां कृतरुचिरमार्गं परिहरन्
अकम्पं विस्रम्भं विदधदभिरक्षेदयमिति।
व्यवस्यन् गोप्तृत्वं व्यपसरदुपायान्तरकथः
भवत्या संश्लिष्टे भगवति निदध्यान्निजभरम्॥ १७ ॥

न्यासक्रिया करणमन्त्र पदानुरोधात्
उद्देश्यमात्महविषि स्वयमर्प्यमाणे।
वाराशिपुत्रि भवती विशिनष्टि नाथं
यागे महेन्द्रमखिलाम्ब यथा महत्त्वम्॥ १८ ॥

इच्छार्जित बहुदेहामिन्द्रादि पदप्रदावलोकलवाम्।
ईशानां भुवनानामीडीमहि नियतमिन्दिरे भवतीम्॥ १९ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे ऐश्वर्यस्तबकः ॥


www.prapatti.com